## तुदादिगणे शत्रन्तप्रातिपदिकनिर्माणम्

### तुदादौ शतृ–व्यवस्था

शतृ–प्रत्ययः शित् इति कारणतः **तिङ्शित्सार्वधातुकम्** (३.४.११३) इति सूत्रेण सार्वधातुकप्रत्ययः | शतृ–प्रत्ययः नित्यं कर्त्रर्थे च | तुदादिगणे, कर्त्रर्थे सार्वधातुकप्रत्यये परे धातुभ्यः श–विकरणप्रत्ययः विहितः अस्ति | वस्तुतः प्रथमं **कर्तरि शप्** (३.१.६८) इत्यनेन शप् विहितः, तदा **कर्तरि शप्** इति सूत्रं प्रबाध्य **तुदादिभ्यः शः** (३.१.७७) आगत्य कार्यं करोति | किमर्थम् ? अस्यां दशायां **तुदादिभ्यः शः** स्वस्य कार्यं न करोति चेत् इदं सूत्रं निरवकाशं भविष्यति | **कर्तरि शप्** इत्यस्य अन्यत्रलब्धावकाशः अस्ति | अतः **तुदादिभ्यः शः**, **कर्तरि शप्** इत्यस्य अपवादभूतसूत्रम् | **पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः** इति परिभाषया यत् सूत्रं अपवादः अस्ति, तत् अपरस्य अपेक्षया बलवत् | अतः अत्र **तुदादिभ्यः शः** इति सूत्रस्य कार्यं सिध्यति |

**तुदादिभ्यः शः** (३.१.७७) = कर्त्रर्थे सार्वधातुकप्रत्ययः परे अस्ति चेत्, तुदादिगणे स्थितेभ्यः  धातुभ्यः श–प्रत्ययः भवति | तुद् आदिर्येषां ते, तुदादयः बहुव्रीहिसमासः, तेभ्यः तुदादिभ्यः | तुदादिभ्यः पञ्चम्यन्तम्, श प्रथमान्तम्, द्विपदमिदं सूत्रम् | **कर्तरि शप्** (३.१.६८) इत्यस्मात् **कर्तरि** इत्यस्य अनुवृत्तिः; **सार्वधातुके यक्** (३.१.६७) इत्यस्मात् **सार्वधातुके** इत्यस्य अनुवृत्तिः | **प्रत्ययः** (३.१.१), **परश्च** (३.१.२), **धातोः** (३.१.९१) इत्येषाम् अधिकारः | अनुवृत्ति–सहित–सूत्रम्— **कर्तरि सार्वधातुके तुदादिभ्यः धातुभ्यः परश्च श प्रत्ययः** |

**कर्तरि शप्** (३.१.६८) = कर्त्रर्थे सार्वधातुकप्रत्ययः परे अस्ति चेत्, तर्हि धातुतः शप्–प्रत्ययः भवति | अनुवृत्ति–सहित–सूत्रम्— **कर्तरि सार्वधातुके धातोः परश्च शप् प्रत्ययः** |

अयं श–प्रत्ययः शित्, अतः अनेन गुण–कार्यं विहितं यत्र यत्र प्रसक्तम् | परन्तु शः अपित्वात् **सार्वधातुकमपित्** इति सूत्रेण ङिद्वत् | ङिद्वत् अतः **क्क्ङिति च** इति कारणेन यत्र यत्र गुण–कार्यं विहितम्, तत्र तत्र निषिद्धम् |

**सार्वधातुकमपित्** (१.२.४) = अपित् सार्वधातुकम् ङित् इव अस्ति | सार्वधातुकम् प्रथमान्तम्, अपित् प्रथमान्तं, द्विपदमिदं सूत्रम् | अनुवृत्ति–सहितं सूत्रम्— **सार्वधातुकम् अपित् ङित्** |

**क्क्ङिति च** (१.१.५) = यः प्रत्ययः गित्, कित् अथवा ङित् अस्ति, अपि च तस्मात् प्रत्ययात् पूर्वं तस्य एव प्रत्ययस्य कारणतः इकः स्थाने गुणः वा वृद्धिः वा भवति स्म, सः (गुणः वृद्धिः) न भवति | अनुवृत्ति–सहितं सूत्रम्— **क्क्ङिति च इकः गुणवृद्धी न** |

आहत्य तुदादिगणे शतृ–प्रत्यये परे श–प्रत्ययः विहितः | श च ङिद्वत् | अस्य एकः परिणामः गुणनिषेधः | परन्तु यथा दृष्टं दिवादिगणे प्रत्ययस्य ङिद्वत् भवनेन केवलं गुणनिषेधः सिद्धः इति न; तस्य अनेके प्रभावाः सन्ति | तेषु त्रयः प्रमुखाः अधोलिखिताः |

### किति ङिति विशिष्ट–कार्याणि

यः कोऽपि प्रत्ययः कित् ङित् वा भवति, तं प्रत्ययं निमित्तीकृत्य पूर्वं स्थिते अङ्गे यथासङ्गं त्रीणि विशिष्टकार्याणि प्रवर्तनीयानि—

१) अङ्गान्ते उपधायां च इकः गुणः निषिद्धः | तुदादौ तुद् + श + ति → तुदति | तुद् + श + शतृ → तुदत् | **क्क्ङिति च** (१.१.५) |
२) अनिदित्–धातूनाम् उपधायां न्–लोपः | येषां हलन्तधातूनाम् इत्–संज्ञकः ह्रस्वः इकारः नास्ति, तेषां धातूनाम् उपधायां नकारः अस्ति चेत्, तस्य लोपो भवति | तृम्फ् + श + ति → न्–लोपः | तृम्फ् + श + शतृ → न्–लोपः | **अनिदितां हल उपधाया क्ङिति** (६.४.२४) | परन्तु तुदादितणे विशिष्ट–वार्तिकेन एषां पुनः नुमागमः आनीयते | **शे तृम्फादीनां नुम्वाच्यः** | तृम्फ् + श + ति → न्–लोपः → तृफ् + अ + ति → नुम्–आगमः → तृम्फ् + अ + ति → तृम्फति |
३) सम्प्रसारणिनां धातूनाम् सम्प्रसारणम् | यण्–स्थाने इक्–आदेशः (यण्–सन्धौ यथा भवति, तस्य विपरीतक्रमः), किति ङिति प्रत्यये परे | व्रश्च् + श + ति → वृश्चति | व्रश्च् + श + शतृ → वृश्चत् | **ग्रहि ज्या वयि व्यधि वष्टि विचति वृश्चति पृच्छति भृज्जतीनां ङिति च** (३.१.१३) |

धेयं यत् दिवादिगणे तुदादिगणे च यद्यपि उभयत्र विकरणः अपित् (श्यन्, श), तथापि सर्वत्र तयोः कार्यं समानं नास्ति; भेदाः सन्ति यतोहि श्यन् → य हलादिः अपित् प्रत्ययः; श → अ अजादिः अपित् प्रत्ययः | हलादि–अजादि–भेदात् कार्ये भेदास्सन्ति | परन्तु उपरितन–नियमत्रयं सार्वत्रिकम् | नाम कित् ङित्–प्रत्ययः परे अस्ति चेत्, एषां त्रयाणां कार्यं भवत्येव | एषु त्रिषु नियमेषु—गुण–निषेधः, न्–लोपः, सम्प्रसारणम् इत्येषु—प्रत्ययस्य हलादि–अजादि–भेदात् न कोऽपि प्रभावः |

किन्तु अन्यत्र हलादि–अजादि–भेदेन कार्ये भेदः | यद्यपि कार्ये कित्–ङित् इति प्रसङ्गः अस्ति, परन्तु हलादि परे, अजादि परे वा इति कुत्रचित् उक्तम् | यथा प्रत्ययः हलादिः कित्–ङित् चेत्, **हलि च** (८.२.७७) इत्यनेन रेफान्तानां वकारान्तानां च धातूनाम् उपधायां स्थितः इक्–वर्णः दीर्घो भवति | दिवादिगणे श्यन् हलादिः अतः इदं कार्यं भवति (जॄ + य → जिर् + य → **जीर्** + य → जीर्यति); तुदादौ श अजादिः अतः न भवति | अन्यत्र प्रत्ययः अजादिः कित्–ङित् चेदेव भवति | यथा **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इति सूत्रेण (किति ङिति) अचि परे, इकारान्त–उकारान्तधातुरूपि–अङ्गस्य इकारस्य उकारस्य स्थाने क्रमशः इयङ् उवङ् आदेशः भवति | रि + अ + ति → र् + इय् + अ + ति → रियति | दिवादौ श्यन् हलादिः अतः इदं कार्यं न सम्भवति |

अन्यानि कित्–ङित्–निमित्तकानि कार्याणि यथासङ्गं वक्ष्यन्ते |

<u>आयोजन–विधिः</u>

आहत्य यथासामान्यं शतृ–प्रत्यये परे अस्माकं सोपानद्वयं प्रवर्तनीयम्—
१. विकरणप्रत्यय–निमित्तकम् अङ्गकार्यम्, तदा धातु–विकरणप्रत्यययोः मेलनम्
२. शतृप्रत्यय–निमित्तकम् अङ्गकार्यं, तदा अङ्ग–शतृप्रत्यययोः मेलनम्

तुदादिगणे उपर्युक्तानि श–निमित्तकानि कार्याणि प्रथमसोपाने भवन्ति यथास्थानम्; द्वितीयसोपाने अङ्गम् अदन्तम् अतः अङ्गकार्यं (गुणकार्यं) नास्ति; वर्णनिमित्तकं कार्यम् अस्ति यथासामान्यम्, **अतो गुणे** (६.१.९७) इत्यनेन |

धातवः चतुर्दशविधाः इत्यस्माभिः पूर्वमेव ज्ञातम् | अजन्तधातवः अन्त्यक्रमेण आयोजिताः; हलन्तधातवः उपधा–क्रमेण विभक्ताः | अजन्तधातवः— अकारान्ताः, आकारान्ताः, इकारान्ताः, ईकारान्ताः, उकारान्ताः, ऊकारान्ताः, ऋकारान्ताः, ॠकारान्ताः, एजन्ताः च | हलन्तधातवः— अदुपधाः, इदुपधाः, उदुपधाः, ऋदुपधाः, शेषधातवः चेति | तर्हि अनेन आयोजनेन अग्रे सामान्यधातवः येषां तुदादौ

किमपि अङ्गकार्यं नास्ति, तानि सूच्यन्ते; तदा विशेषधातूनां कार्याणि सूच्यन्ते |

**तुदादिगणः (157 धातवः)**

**A.** सामान्यधातवः (114 धातवः)

एषां धातूनां कृते शत्रन्तप्रातिपदिकनिर्माण–समये किमपि कार्यं नास्ति | केवलं वर्णमेलनम् | लघु–इगुपधधातुः चेत् **पुगन्तलघूपधस्य च** (७.३.८६) इत्यनेन गुणः, तदा **सार्वधातुकमपित्** (१.२.४), **क्क्ङिति च** (१.१.५) इत्याभ्यां गुणनिषेधः |

अदुपधधातवः (4 धातवः)

त्वच् + श → त्वच → त्वच + शतृ → त्वच + अत् → **अतो गुणे** (६.१.९७) इत्यनेन पूर्वपरयोः एकः पररूपादेशः → त्वचत्

लज् → लजत्, कड् → कडत्, चल् → चलत्

इदुपधधातवः (23 धातवः)

लिख् + श → लिख → लिख + शतृ → लिख + अत् → **अतो गुणे** (६.१.९७) इत्यनेन पूर्वपरयोः एकः पररूपादेशः → लिखत्

उदुपधधातवः (55 धातवः)

तुद् + श → तुद → तुद + शतृ → तुद + अत् → **अतो गुणे** (६.१.९७) इत्यनेन पूर्वपरयोः एकः पररूपादेशः → तुदत्

ऋदुपधधातवः (21 धातवः)

सृज् + श → सृज → सृज + शतृ → सृज + अत् → **अतो गुणे** (६.१.९७) इत्यनेन पूर्वपरयोः एकः पररूपादेशः → सृजत्

शेषधातवः (10 धातवः)

चर्च् + श → चर्च → चर्च + शतृ → चर्च + अत् → **अतो गुणे** (६.१.९७) इत्यनेन पूर्वपरयोः एकः पररूपादेशः → चर्चत्

**B.** विशेषधातवः (44 धातवः)

1. इगन्तधातवः (16 धातवः)

इगन्तधातवः = इक् प्रत्याहारस्य कश्चन सदस्यः अन्ते येषां ते | इक् प्रत्याहारः नाम इ, उ, ऋ, ऌ | अतः अस्मिन् इकारान्तधातवः, उकारान्तधातवः, ऋकारान्तधातवः च अन्तर्भूताः |

एतावता अस्माभिः दृष्टं यत् भ्वादिगणे शप् पित् अतः सर्वत्र इगन्तधातौ गुणः— नी → ने, भू → भो, कृ → कर् इति | दिवादिगणे श्यन् अपित् अतः गुण–निषेधः; तत्र गुणाभावे विशिष्टकार्याणि वर्तन्ते | तुदादिगणः अपि तथा |

श इति विकरणप्रत्ययः | अयं श–प्रत्ययः सार्वधातुकः (**तिङ्–शित्सार्वधातुकम्**), अपित् (पकारः इत् यस्य न), ङिद्वत् (**क्ङिति च**), अजादिः (अच् आदौ यस्य सः) च | अतः सङ्क्षेपे अजादिः अपित् इति वदेम |

एतावता वयं दृष्टवन्तः यत् व्याकरणे इ, उ, ऋ इत्येषां कार्यद्वयं सम्भवति—
१. गुणादेशः | नाम इ → ए, उ → ओ, ऋ → अर् इति |
२. यण् आदेशः (**इको यणचि**) | नाम इ → य्, उ → व्, ऋ → र् इति |

अधुना इतोऽपि द्वे कार्ये सम्भवतः इति बोध्यम्—
३. इयङ्, उवङ् आदेशौ | इ → इय्, उ → उव् |
४. रिङ् इत्यादेशः | ऋ → रि |
कुत्र एतादृशकार्ययोः अवसरः प्राप्तः इति अधः पश्येम |

a. <u>इकारान्तधातवः</u> (4 धातवः)

श इति विकरणप्रत्ययः अजादिः अपित् इति कारणतः एकं सूत्रम् अत्र कार्यं करोति— **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) | अनेन इकारान्तधातूनाम् इयङ् आदेशः भवति अजाद्यपिति प्रत्यये परे | क्रमेण इदं कार्यं अवलोकयेम | तुदादिगणीयः रि इति धातुः |

१. अयं रि–धातुः यदि भ्वादिगणे अभविष्यत्, तर्हि शतरि किं रूपम् अभविष्यत् इति चिन्तयेम | रि + शप् → रि + अ → **सार्वधातुकार्धधातुकयोः** इत्यनेन गुणः → रे + अ → **एचोऽयवायावः** इत्यनेन अयादेशः → रय → रय + शतृ → रयत् | इदं केवलं चिन्तनार्थं; रि–धातुः भ्वादौ नास्ति अतः इदं रूपं न सम्भवति |

२. यदि तुदादिगणे सामान्यचिन्तनम् अकरिष्याम, तर्हि रि–धातोः शतरि किं रूपम् अभविष्यत् इति चिन्तयेम | रि + श → रि + अ → **इको यणचि** इत्यनेन यण्–सन्धेः प्राप्तिः → र्य → र्य + शतृ → र्यत् | इदं केवलं चिन्तनार्थं; वास्तवे **इको यणचि** बाधितम् अस्ति अतः इदं रूपं न सम्भवति |

३. वस्तुस्थितिः का इति अग्रे पश्येम | रि + श → रि + अ → **इको यणचि** इत्यनेन यण्–प्रसक्तिः → बाधितं बलाबलेन → **सार्वधातुकार्धधातुकयोः** इत्यनेन गुणप्रसक्तिः → **सार्वधातुकम् अपित्** इत्यनेन श–प्रत्ययः ङिद्वत्, **क्ङिति च** इत्यनेन गुणनिषेधः → रि + अ → श–प्रत्ययः अजाद्यपित् अतः तस्मात् पूर्वं स्थितस्य इकारान्तधातोः इकारस्य इयङ्–आदेशः भवति |

**अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) = श्नुप्रत्ययान्ताङ्गस्य (स्वादिगणस्य अङ्गस्य यथा शक्नु, चिनु इत्यनयोः), इकारान्त–उकारान्तधातुरूपि–अङ्गस्य, भ्रू–प्रातिपदिकस्य च— एषाम् इकारस्य उकारस्य स्थाने क्रमेण इयङ् उवङ् च आदेशः भवति अजादि–प्रत्यये परे | श्नु–प्रसङ्गे **प्रत्ययग्रहणे तदन्ता ग्राह्याः** (परिभाषा #२३) इति परिभाषया तदन्तविधिः; अनेन यस्य अङ्गस्य अन्ते श्नु–प्रत्ययः स्यात्, तस्मात् इत्यर्थः | य्वोः इति विशेषणं "धातु" शब्दस्य एव यतोहि श्नुप्रत्ययान्ताङ्गम्, भ्रू प्रातिपदिकम् च उकारान्तः एव अतः तत्र इयङ् इत्यस्य प्रसक्तिः नास्ति | तर्हि 'धातु' इत्येव अवशिष्यते यस्य कृते य्वोः इति विशेषणं योग्यम् | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन यस्य धातोः अन्ते इकार–उकारः स्यात् इति अर्थः | श्नुश्च धातुश्च, भ्रुश्च तयोः इतरेतरद्वन्द्वः श्नुधातुभ्रुवः, तेषां श्नुधातुभ्रुवाम् | इश्च उश्च तयोः इतरेतरद्वन्द्वः यू, तयोः य्वोः | इयङ् च उवङ् च तयोः इतरेतरद्वन्द्वः, इयङुवङौ | अचि सप्तम्यन्तं, श्नुधातुभ्रुवां षष्ठ्यन्तं, य्वोः षष्ठ्यन्तम्, इयङुवङौ प्रथमान्तम्, अनेकपदमिदं सूत्रम् | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **य्वोः श्नुधातुभ्रुवाम् अङ्गानां इयङुवङौ अचि** |

**अनेकाल्शित् सर्वस्य** (१.१.५५) = आदेशः अनेकाल् (आदेशे एक एव वर्णः न अपि तु अनेके वर्णाः) अथवा शित् चेत्, सर्वस्थानिनः स्थाने भवति (न तु अन्त्यवर्णस्य) | (यस्य स्थाने आदेशः आदिष्टः, सः स्थानी |) इदं सूत्रम् **अलोऽन्त्यस्य** (१.१.५२) इत्यस्य अपवादः | न एकः अनेकः नञ्तत्पुरुषः; अनेकः अल् यस्य सः अनेकाल् बहुब्रीहिः; शकारः इत् यस्य सः शित् बहुब्रीहिः; अनेकाल् च शित् च अनेकाल्शित् समाहारद्वन्द्वः | अनेकाल् प्रथमान्तं, शित् प्रथमान्तं, सर्वस्य षष्ठ्यन्तं, त्रिपदमिदं सूत्रम् | **स्थानेऽन्तरतमः** (१.१.५०) इत्यस्मात् **स्थाने** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **अनेकाल्शित् सर्वस्य स्थाने** |

**ङिच्च** (१.१.५३) = आदेशः ङित् चेत्, तर्हि अनेकाल् चेदपि अङ्गस्य अन्त्यस्य एव स्थाने आदेशः | इदं सूत्रम् **अनेकाल् शित्सर्वस्य** (१.१.५५) इत्यस्य अपवादः; **अनेकाल् शित्सर्वस्य** (१.१.५५) तु **अलोऽन्त्यस्य** (१.१.५२) इत्यस्य अपवादः | ङित् प्रथमान्तम्, च अव्ययपदम्, द्विपदमिदं सूत्रम् | **अलोऽन्त्यस्य** (१.१.५२) इत्यस्मात् **अन्त्यस्य** इत्यस्य अनुवृत्तिः; **स्थानेऽन्तरतमः** (१.१.५०) इत्यस्मात् **स्थाने** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **ङित् च अन्त्यस्य स्थाने** |

रि + अ → र् + इय् + अ → रिय+ शतृ → रिय + अत् → **अतो गुणे** (६१.९७) इत्यनेन पूर्वपरयोः एकः पररूपादेशः → रियत्

तुदादिगणे चत्वारः इकारान्तधातवः रि, पि, धि, क्षि | एषां सर्वेषां कार्यं रि यथावत् अतः रियत्, पियत्, धियत्, क्षियत् |

b. <u>उकारान्त/ऊकारान्तधातवः</u> (6 धातवः)

श इति विकरणप्रत्ययः अजादिः अपित् इति उक्तम्; तस्मात् कारणात् अत्र पुनः इदं सूत्रम् प्रवर्तते— **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) | अनेन उकारान्तधातूनाम् उवङ् आदेशः भवति अजाद्यपिति प्रत्यये परे | क्रमेण इदं कार्यं अवलोकयेम | तुदादिगणीयः गु इति धातुः |

१. अयं गु–धातुः यदि भ्वादिगणे अभविष्यत्, तर्हि शतरि किं रूपम् अभविष्यत् इति चिन्तयेम | गु + शप् → गु + अ → **सार्वधातुकार्धधातुकयोः** इत्यनेन गुणः → गो + अ → **एचोऽयवायावः** इत्यनेन अवादेशः → गव् + अ → गव → गव + शतृ → गवत् | इदं केवलं चिन्तनार्थम्; अयं गु–धातुः भ्वादौ नास्ति अतः इदं रूपं न सम्भवति |

२. यदि तुदादिगणे सामान्यचिन्तनम् अकरिष्याम, तर्हि गु–धातोः शतरि किं रूपम् अभविष्यत् इति चिन्तयेम | गु + श → गु + अ → **इको यणचि** इत्यनेन यण्–सन्धेः प्राप्तिः → ग्व → ग्व + शतृ → ग्वत् | इदं केवलं चिन्तनार्थम्; वास्तवे **इको यणचि** बाधितम् अस्ति अतः इदं रूपं न सम्भवति |

३. वस्तुस्थितिः का इति अग्रे पश्येम | गु + श → गु + अ → **इको यणचि** इत्यनेन यण्–प्राप्तिः → बाधितं बलाबलेन → **सार्वधातुकार्धधातुकयोः** इत्यनेन गुणप्राप्तिः → **सार्वधातुकम् अपित्** इत्यनेन श ङिद्वत्, **क्ङिति च** इत्यनेन गुणनिषेधः → गु + अ → श प्रत्ययः अजाद्यपित् अतः उवङ् आदेशः भवति |

**अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** इत्यस्य अर्थः उपरि दत्तः | अत्र गु–धातुः उकारान्तः अतः उकारस्य स्थाने उवङ् आदेशः न तु इयङ्, इत्येव भेदः | यतः सूत्रं वक्ति यत् इकारान्तधातोः स्थाने इयङ्, उकारान्तधातोः स्थाने उवङ् इति | तदा उवङ् आदेशः कस्य स्थाने इति चेत्, पुनः **अनेकाल् शित्सर्वस्य** इत्यस्य अपवादे **ङिच्च** सूचयति यत् अन्त्यस्य एव आदेशः | तर्हि उवङ् आदेशः भवति अन्त्यस्य उकारस्य स्थाने |

गु + अ → ग् + उव् + अ → गुव → गुव + अत् → **अतो गुणे** (६.१.९७) इत्यनेन पूर्वपरयोः एकः पररूपादेशः → गुवत्

तुदादिगणे षट् उकारान्तधातवः गु, ध्रु, कुङ्, णू, धू, षू इति | एषां सर्वेषां कार्यं गु यथावत् अतः गुवत्, ध्रुवत्, कुवमान (ङित् अतः आत्मनेपदिधातुः), नुवत्, धुवत्, सुवत् |

c. <u>ऋकारान्तधातवः</u>

तुदादिगणे चत्वारः ऋकारान्तधातवः सन्ति— मृङ्, पृङ्, दृङ्, धृङ् च | इमे सर्वे ङितः अतः **अनुदात्तङित आत्मनेपदम्** (१.३.१२) इत्यनेन आत्मनेपदिनः | तस्मात् शानच् एव भवति न तु शतृ | तथापि सङ्क्षेपे शानजार्थं किं भवति इति पश्येम | शानच् अपि कर्त्रर्थे सम्भवति, तदा शित् तु अस्त्येव अतः तस्य सार्वधातुकत्वात् **कर्तरि शप्** इत्यनेन शप् विहितः |

शपं प्रबाध्य श–विकरणप्रत्ययः आयाति इति ज्ञातम् | तस्मात् कारणात् अत्र **रिङ् शयग्लिङ्क्षु** (७.४.२८) इति सूत्रं कार्यं करोति | अनेन ऋकारान्तधातूनां रिङ् आदेशः भवति, श–प्रत्ययः परे अस्ति चेत् | क्रमेण इदं कार्यं अवलोकयेम | तुदादिगणीयः मृङ् इति धातुः |

१. अयं मृङ् धातुः यदि भ्वादिगणे अभविष्यत्, तर्हि शानचि किं रूपम् अभविष्यत् इति चिन्तयेम | मृ + शप् → मृ + अ → **सार्वधातुकार्धधातुकयोः** इत्यनेन गुणः → मर् + अ → मर + शानच् → अनुबन्धलोपे → मर + आन → **आने मुक्** (७.२.८२) इत्यनेन आने परे अदन्ताङ्गस्य मुक्–आगमो भवति → मर + मान → मरमान | इदं केवलं चिन्तनार्थं किल; अयं मृङ् धातुः भ्वादौ नास्ति अतः इदं रूपं न सम्भवति |

२. यदि तुदादिगणे सामान्यचिन्तनम् अकरिष्याम, तर्हि मृङ्–धातोः शानचि किं रूपम् अभविष्यत् इति चिन्तयेम | मृ + श → मृ + अ → **इको यणचि** इत्यनेन यण्–सन्धेः प्राप्तिः → म्र → म्र + शानच् → अनुबन्धलोपे → म्र + आन → **आने मुक्** (७.२.८२) इत्यनेन

आने परे अदन्ताङ्गस्य मुक्–आगमो भवति → म्र + मान → म्रमान | इदं केवलं चिन्तनार्थम्; वास्तवे **इको यणचि** बाधितम् अस्ति अतः इदं रूपं न सम्भवति |

३. वस्तुस्थितिः का इति अग्रे पश्येम |

मृ + श → मृ + अ → **इको यणचि** (६.१.७७) इत्यस्य प्राप्तिः, तत् प्रबाध्य **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यनेन गुण–प्राप्तिः, **सार्वधातुकमपित्** (१.२.४) इत्यनेन अपित्त्वात् ङिद्वत्, **क्क्ङिति च** (१.१.५) इत्यनेन ङिद्वात् गुणनिषेधः → **रिङ् शयग्लिङ्क्षु** (७.४.२८) इत्यनेन श–प्रत्यये परे ऋकारान्तस्य अङ्गस्य रिङ्–आदेशः (मृ–धातोः पूर्णतया स्थाने रि); **ङिच्च** (१.१.५३) इत्यनेन आदेशः ङित् चेत्, तर्हि अनेकाल् चेदपि अङ्गस्य अन्त्यस्य एव स्थाने आदेशः → म् + रि + अ → म्रि + अ → **इको यणचि** इत्यनेन यण्–सन्धेः प्राप्तिः → श–प्रत्ययः अजादिः अपित् अतः यण्–सन्धिं प्रबाध्य **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यनेन इयङ् आदेशः → इयङ् आदेशः ङित् अतः **ङिच्च** इत्यनेन अन्त्यस्य एव आदेशः, इकारस्य स्थाने इय्–आदेशः → म् + इय् + अ → म्रिय् + अ → म्रिय → म्रिय + शानच् → अनुबन्धलोपे → म्रिय + आन → **आने मुक्** (७.२.८२) इत्यनेन आने परे अदन्ताङ्गस्य मुक्–आगमः → म्रिय + मान → वर्णमेलने, णत्वे → म्रियमाण |

**रिङ् शयग्लिङ्क्षु** (७.४.२८) = ऋकारान्तस्य अङ्गस्य रिङ्–आदेशो भवति श–प्रत्यये, यक्–प्रत्यये, यकारादि–आर्धधातुक–लिङ् च परे | **यि असार्वधातुके** च लिङः विशेषणम् | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन **ऋतः अङ्गस्य** नाम न केवलम् ऋकारस्य इत्यङ्गस्य, अपि तु ऋकारान्तस्य अङ्गस्य | **रिङ्** ङित्, अतः **अलोऽन्त्यस्य** (१.१.५२) इत्यस्य बाधकसूत्रम् **अनेकाल् शित्सर्वस्य** (१.१.५५), तत् प्रबाध्य **ङिच्च** (१.१.५३) इति सूत्रेण आदेशः ङित् चेत्, तर्हि अनेकाल् चेदपि अङ्गस्य अन्त्यस्य एव स्थाने आदेशः इति | **यस्मिन् विधिः तदादावल्ग्रहणे** इति परिभाषया **यि** नाम यकारादौ (यस्य आदौ यकारः, तस्मिन् परे) | शश्च यक् च लिङ् च तेषामितरेतरद्वन्द्वः शयग्लिङः, तेषु शयग्लिङ्क्षु | रिङ् प्रथमान्तम्, शयग्लिङ्क्षु सप्तम्यन्तम्, द्विपदमिदं सूत्रम् | **अयङ् यि क्ङिति** (७.४.२२) इत्यस्मात् **यि**, **अकृत्सार्वधातुकयोर्दीर्घः** (७.४.२५) इत्यस्मात् **असार्वधातुके**, **रीङ् ऋतः** (७.४.२७) इत्यस्मात् **ऋतः** इत्येषाम् अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **यि असार्वधातुके शयग्लिङ्क्षु ऋतः अङ्गस्य रिङ्** |

**येन विधिस्तदन्तस्य** (१.१.७२) = विशेषणं तदन्तस्य अपि भवति, स्वस्यापि भवति | सोऽन्ते यस्य स तदन्तः, तस्य तदन्तस्य बहुव्रीहिः | विधीयते इति विधिः | येन तृतीयान्तम्, विधिः प्रथमान्तम्, तदन्तस्य षष्ठ्यन्तम्, त्रिपदमिदं सूत्रम् | **स्वं रूपं शब्दस्याऽशब्दसंज्ञा** (१.१.६८) इत्यस्मात् **स्वम्, रूपम्** इत्यनयोः अनुवृत्तिः | विभक्तिपरिणामः इत्यनेन षष्ठ्यन्ते भवतः, **स्वस्य रूपस्य** | अनुवृत्ति–सहितसूत्रम्— **येन विधिः तदन्तस्य स्वस्य रूपस्य** (च)| परिभाषासूत्रम् |

**ङिच्च** (१.१.५३) = आदेशः ङित् चेत्, तर्हि अनेकाल् चेदपि अङ्गस्य अन्त्यस्य एव स्थाने आदेशः | इदं सूत्रम् **अनेकाल् शित्सर्वस्य** (१.१.५५) इत्यस्य अपवादः; **अनेकाल् शित्सर्वस्य** (१.१.५५) तु **अलोऽन्त्यस्य** (१.१.५२) इत्यस्य अपवादः | ङित् प्रथमान्तम्, च अव्ययपदम्, द्विपदमिदं सूत्रम् | **अलोऽन्त्यस्य** (१.१.५२) इत्यस्मात् **अन्त्यस्य** इत्यस्य अनुवृत्तिः; **स्थानेऽन्तरतमः** (१.१.५०) इत्यस्मात् **स्थाने** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **ङित् च अन्त्यस्य स्थाने** |

अत्र एकः प्रश्नः उदेति— यदा रिङ्–आदेशः विहितः, तदा म्रि इति रूपम् | अस्यां स्थित्यां धातुसंज्ञा नास्ति किल, तर्हि **अचि श्नुधातुभ्रुवां**

**य्वोरियङुवङौ** इत्यस्य प्रसक्तिः कथम् ?

आदेशस्य योजनेन आगमस्य योजनेन च धातुः धातुरेव तिष्ठति; स्वस्य धातुसंज्ञा तिष्ठति | मृ → म्रि इत्यस्य विकारेण म्रि तदानीं धातुः; तस्य धातुसंज्ञा तदानीम् अस्ति | यतः रि इति आदेशः | अनन्तरम् इयङ् इति आदेशस्य संयोजनेन अपि धातुसंज्ञा वर्तते | म्रि → म्रिय् अयमपि धातुः | परन्तु एकवारं यदा विकरणप्रत्ययः संयोजितः, तदा धातुसंज्ञा न तिष्ठति | म्रिय् + अ → म्रिय | श इति विकरणप्रत्ययः; तस्य पृथक् प्रत्ययसंज्ञा अस्ति अतः तस्य संयोजनेन म्रिय इति अधुना धातुः नास्ति | अस्यां दशायां धातुसंज्ञा न तिष्ठति, अधुना अङ्गसंज्ञा एव वर्तते |

तुदादिगणे चत्वारः ऋकारान्तधातवः मृङ्, पृङ्, दृङ्, धृङ् | एषां सर्वेषां कार्यं मृङ्–धातोरिव अतः म्रियमाण, प्रियमाण, द्रियमाण, ध्रियमाण इति |

***हलि च** इति सूत्रे यथा, तथैव **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** इति सूत्रे अपिति परे, किति परे, ङिति परे वा नोक्तम्, न वा अनुवृत्तौ अस्ति | परन्तु अनयोः सूत्रयोः कार्यं न सम्भवति पिति परे | अतः पाणिनेः वदनस्य आवश्यकता नासीत् | "अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः" इत्युच्यते | अर्धमात्रायाः अपि व्यर्थता न भवति | अत्र अस्माभिः अनुमानेन अवगतमेव |

d. दीर्घ–ऋकारान्तधातवः (द्वौ धातू स्तः)

तुदादिगणे कॄ, गॄ इति द्वौ ॠकारान्तधातू स्तः |

अधुना अस्माभिः दृष्टं यत् ह्रस्व–ऋकारान्तधातूनां रिङ्–आदेशः भवति, यथा मृङ् → (रिङ् आदेशः) म्रि → (इयङ् आदेशः) म्रिय् + (श विकरणप्रत्ययः) अ → म्रिय इति अङ्गम्, म्रियमाण इति शानजन्तरूपम् | परन्तु दीर्घॠकारान्तधातूनां कार्यं भिन्नम् | स्मर्यते यत् दिवादिगणे दीर्घॠकारान्तधातुषु ॠकारस्य स्थाने इ–आदेशः जॄ → जि | तुदादिगणे अपि तथा; उभयत्र **ॠत इद्धातोः** (७.१.१००) इत्यस्य प्रसक्तिः | परन्तु ततः अग्रे भिद्यते यतोहि दिवादिगणे श्यन् हलादिः अपित्; किन्तु तुदादिगणे श अजादिः अपित् | दिवादिगणे **हलि च** इत्यनेन उपधायाम् इकः दीर्घत्वम्, परन्तु तुदादिगणे **हलि च** इत्यस्य प्रसक्तिः नास्ति अतः उपधायाम् इक् ह्रस्वः तिष्ठति | अग्रे क्रमः प्रदत्तः अस्ति— कॄ इति धातुः |

कॄ + श → कॄ + अ → **इको यणचि** (६.१.७७) इत्यनेन यण्–सन्धेः प्राप्तिः → तं प्रबाध्य **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यनेन गुणप्राप्तिः → **सार्वधातुकम् अपित्** (१.२.४) इत्यनेन श ङिद्वत्, **क्ङिति च** (१.१.५) इत्यनेन गुणनिषेधः → कॄ + अ → **ॠत इद्धातोः** (७.१.१००) इत्यनेन ॠदन्तस्य धातोः ह्रस्व–इकारादेशः → कि + अ → **उरण् रपरः** (१.१.५१) इत्यनेन ऋकारस्य स्थाने यदा अण्–आदेशः भवति, तदा सः अण् सदा रपरः → किर् + अ → किर → किर + शतृ → किर + अत् → **अतो गुणे** (६.१.९७) इत्यनेन पूर्वपरयोः एकः पररूपादेशः → किरत्

**ॠत इद् धातोः** (७.१.१००) = ॠदन्तस्य धातोः अङ्गस्य ह्रस्व–इकारादेशो भवति (किति ङिति प्रत्यये परे) | कित्–ङित् भिन्नप्रत्ययः परे चेत्, गुणे सति इकारादेशस्य प्रसक्तिर्न भवति | **अलोऽन्त्यस्य** (१.१.५२) इत्यस्य साहाय्येन पूर्णतया धातोः स्थाने न, अपि तु अन्तिमस्य ॠकारस्य स्थाने ह्रस्व–इकारादेशः | ॠतः षष्ठ्यन्तम्, इत् प्रथमान्तम्, धातोः षष्ठ्यन्तम्, त्रिपदमिदं सूत्रम् | **अङ्गस्य**

(६.४.१) इत्यस्य अधिकारः | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यस्य साहाय्येन **ऋतः** इत्यनेन ऋदन्तस्य इत्यस्यापि ग्रहणम् | अनुवृत्ति–सहितसूत्रम्— **ऋतः धातोः अङ्गस्य इत्** |

**अलोऽन्त्यस्य** (१.१.५२) = षष्ठीविभक्ति–द्वारा यस्य पदस्य स्थाने आदेशः प्राप्तः, सः आदेशः अन्त्यस्य अल्–वर्णस्य स्थाने भवति | अलः षष्ठ्यन्तम्, अन्त्यस्य षष्ठ्यन्तम्, द्विपदमिदं सूत्रम् | **षष्ठी स्थानेयोगा** (१.१.४९) इत्यस्मात् **षष्ठी**, **स्थाने** इत्यनयोः अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **षष्ठ्या अन्त्यस्य अलः स्थाने** (विद्यमानः आदेशः) | परिभाषासूत्रम् |

**येन विधिस्तदन्तस्य** (१.१.७२) = विशेषणं तदन्तस्य अपि भवति, स्वस्यापि भवति | सोऽन्ते यस्य स तदन्तः, तस्य तदन्तस्य बहुव्रीहिः | विधीयते इति विधिः | येन तृतीयान्तम्, विधिः प्रथमान्तम्, तदन्तस्य षष्ठ्यन्तम्, त्रिपदमिदं सूत्रम् | **स्वं रूपं शब्दस्याऽशब्दसंज्ञा** (१.१.६८) इत्यस्मात् **स्वम्, रूपम्** इत्यनयोः अनुवृत्तिः | विभक्तिपरिणामः इत्यनेन षष्ठ्यन्ते भवतः, **स्वस्य रूपस्य** | अनुवृत्ति–सहितसूत्रम्— **येन विधिः तदन्तस्य स्वस्य रूपस्य** (च)| परिभाषासूत्रम् |

**उरण् रपरः** (१.१.५१) = ऋकारस्य स्थाने यदा अण्–आदेशः भवति, तदा सः अण् सदा रपरः भवति | ऋकारेण त्रिंशत्–प्रकारकः ऋकारः भवति इति बोध्यम् | रः परो यस्य सः रपरः | उः षष्ठ्यन्तम्, अण् प्रथमान्तम्, रपरः प्रथमान्तम्, त्रिपदमिदं सूत्रम् | **स्थानेऽन्तरतमः** (१.१.५०) इत्यस्मात् **स्थाने** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **उः स्थाने अण् रपरः** |

ऋकारस्य स्थाने यदा अण्–प्रत्याहारस्य कश्चन सदस्यः ("अ”, "इ”, "उ" वा) आयाति, तदा तस्मात् परे रेफः आयाति | अतः अण् "रपरः" भवति— "अर्", “इर्", “उर्" वा इति | अत्र ऋकारस्य स्थाने इ आगतः, अतः रपरः भवति, इर् इति | कि → किर् |

गॄ धातुः अपि तथा | गॄ + अ → गि + अ → गिर् + अ→ गिर → गिर + शतृ → गिर + अत् → **अतो गुणे** (६.१.९७) इत्यनेन पूर्वपरयोः एकः पररूपादेशः → गिरत्

दिवादिगणे क्रमः तथैव अस्ति, किन्तु अन्ते इकारः दीर्घः भवति—

जॄ → (**ऋत इद्धातोः**) जि → (**उरण् रपरः**) जिर् → (**हलि च**) जीर् + (श्यन् विकरणप्रत्ययः) य → जीर्य → जीर्य +अत्→ जीर्यत्

**हलि च** (८.२.७७) इत्यनेन हलि परे रेफान्तानां वकारान्तानां च धातूनाम् उपधायां स्थितः इक्–वर्णः दीर्घो भवति | दिवादिगणे श्यन् हलादिः अपित् अस्ति; तुदादिगणे श अजादिः अपित् अस्ति | अतः दिवादौ ऋकारान्तधातुषु **हलि च** इत्यस्य प्रसक्तिः; तुदादौ अस्यामेव दशायां **हलि च** कार्यं न करोति |

अत्र **उरण् रपरः** इत्यस्य सम्यक्तया बोधार्थं गुणसन्धिम् एकवारम् अवलोकयाम |

अ/आ + इ/ई = ए
अ/आ + उ/ऊ = ओ
अ/आ + ऋ/ॠ = अर्

इति सामान्यनियमः अस्ति किल | परन्तु गुणसंज्ञा-विधायकसूत्रम् **अदेङ्ग गुणः** (१.१.२) इत्यनेन अ, ए, ओ इत्येषाम् एव वर्णानां गुणसंज्ञा भवति | तत्र "अर्" किमपि नास्ति | यत्र गुणसन्धिः अपेक्षितः, तत्र **आद्गुणः** (६.१.८७) इत्यनेन अवर्णात् अचि परे पूर्वपरयोः एकः गुणादेशः भवति | गुणादेशः नाम पूर्वपरयोः स्थाने 'अ' वा, 'ए' वा 'ओ' वा आगच्छेत् | तत्र "अर्" तु नास्त्येव | तर्हि अ + ऋ → अर् कथम् ? वस्तुतः ऋकारस्य गुणसन्धिः एवं भवति— अ + ऋ → "अ, ए, ओ" इत्येषु गुणसंज्ञकवर्णेषु कश्चन स्वीकर्तव्यः | अधुना **स्थानेऽन्तरतमः** इति सूत्रेण ध्वनि-दृष्ट्या तेषु त्रिषु, द्वयोः वर्णयोः स्थाने कस्य गुणसंज्ञकवर्णस्य उच्चारणार्थं "स्थान-तौल्यम्" अस्ति इति अवलोकनीयं भवति | अकारस्य कण्ठस्थानम्, ऋकारस्य मूर्धास्थानम् | अ, ए, ओ इति गुणसंज्ञकवर्णेषु कस्यापि कण्ठमूर्धास्थानं नास्ति | (अ= कण्ठस्थानम्, ए= कण्ठतालुस्थानम्, ओ= कण्ठोष्ठस्थानम् इति |) तेषु त्रिषु, अ-ऋ इत्यनयोः स्थाने अकारस्य एव अधिकसाम्यं वर्तते | अतः अ-ऋ इत्यनयोः स्थाने "अ" इत्यस्य गुणादेशप्राप्तिः | अधुना ऋ-स्थाने यः अकारः आगतः, सः अण्-प्रत्याहारस्य सदस्यः, अतः **उरण् रपरः** इत्यनेन रेफः परः भवति | तर्हि आहत्य अ/आ + ऋ/ॠ → **आद्गुणः** इत्यनेन पूर्वपरयोः स्थाने 'अ' → **उरण् रपरः** → अर् | महा + ऋषिः → मह् + अर् + षि → महर्षिः |

अवधेयं यत् **ऋत इद्धातोः** इति सूत्रं किति ङिति प्रत्यये परे एव कार्यं करोति | अतः यत्र विकरणप्रत्ययः अपित् नास्ति, तत्र प्रसक्तिः न भविष्यति | वृत्तान्ते भ्वादिगणे तॄ इति धातुः | यद्यपि ॠकारान्तधातुः अस्ति, तथापि **ऋत इद्धातोः** इत्यनेन ॠ-स्थाने इकारादेशः न भवति | भ्वादिगणे शप् पित् अस्ति अतः **सार्वधातुकार्धधातुकयोः** इति सूत्रेण गुणः भवति | तॄ + शप् → तॄ + अ → तर् + अ → तर → तर + शतृ → तरत् |

अतः गणम् अनुसृत्य ॠकारान्तधातूनां कः भेदः इति पश्येम—
भ्वादिगणे तॄ → गुणः → तरत्
दिवादिगणे जॄ → इ-आदेशः, **हलि च** दीर्घः → जीर्यत्
तुदादिगणे कॄ → इ-आदेशः, अजादिः अपित् अतः न दीर्घः → किरत्

केचन जनाः वदन्ति यत् भ्वादितुदादिगणयोः विषयः भ्रमात्मकः, कः धातुः कस्मिन् गणे इति | किन्तु यत्र गणसम्बद्धकार्यं वर्तते, तत्र अस्माकं न कोऽपि भ्रमः स्यात् | भ्वादिगणे गुणकार्यं प्रवर्तते; तुदादिगणे न कुत्रापि गुणकार्यम् | तुदादिगणे विकरणप्रत्ययः अजादिः अपित् अतः अपित्-निमित्तं कार्यं अपि च अजादि-अपित्-निमित्तं कार्यं भवतः, ये भ्वादौ न सञ्जायेते | यथा दीर्घ-ॠकारस्य → इ (**ऋत इद्धातोः**) प्रवर्तते केवलम् अपित्सु प्रत्ययेषु, यथा कॄ → किरत् | इयङ्-आदेशः केवलं अजादिषु अपित्सु प्रवर्तते (**अचि श्नुधातुभ्रुवां य्वोरियङुवङौ**) | रि + अ → र्  + इय् + अ → रिय+ शतृ → रिय + अत् → **अतो गुणे** (६.१.९७) इत्यनेन पररूपादेशः → रियत् |

2. <u>धात्वादेशः</u>

a. पा-आदिधातूनां धात्वादेशः (द्वौ धातू स्तः)

तुदादौ धातुद्वयम्— षद्लृ, शद्लृ |

**पा-घ्रा-ध्मा-स्था-म्ना-दाण्-दृशि-अर्ति-सर्ति-शद-सदां, पिब-जिघ्र-धम-तिष्ठ-मन-यच्छ-पश्य-ऋच्छ-धौ-शीय-सीदाः**

(७.३.७८) = पा घ्रा ध्मा इत्यादीनां स्थाने पिब, जिघ्र, धम एते आदेशाः भवन्ति शिति परे | केवलं शिति परे इति धेयम् | अतः पिबति परन्तु पास्यति इति | पाश्च घ्राश्च ध्माश्च ... सद् च तेषामितरेतरद्वन्द्वः पा-घ्रा-ध्मा-स्था-म्ना-दाण्-दृशि-अर्ति-सर्ति-शद-सदः, तेषां पा-घ्रा-ध्मा-स्था-स्ना-दाण्-दृशि-अर्ति-सर्ति-शद-सदाम् | पिबश्च जिघ्रश्च धमश्च ... सीदश्च तेषामितरेतरद्वन्द्वः पिब-जिघ्र-धम-तिष्ठ-मन-यच्छ-पश्य-ऋच्छ-धौ-शीय-सीदाः | पा-घ्रा-ध्मा-स्था-म्ना-दाण्-दृशि-अर्ति-सर्ति-शद-सदाम् षष्ठ्यन्तं, पिब-जिघ्र-धम-तिष्ठ-मन-यच्छ-पश्य-ऋच्छ-धौ-शीय-सीदाः प्रथमान्तं, द्विपदमिदं सूत्रम् | **ष्ठिवुक्लमुचमां शिति** (७.३.७५) इत्यस्मात् **शिति** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहित-सूत्रमेवम्— **पा-घ्रा-ध्मा-स्था-म्ना-दाण्-दृशि-अर्ति-सर्ति-शद-सदां अङ्गस्य पिब-जिघ्र-धम-तिष्ठ-मन-यच्छ-पश्य-ऋच्छ-धौ-शीय-सीदाः शिति** |

षद्लृ + श → सद् + अ → **पा-घ्रा-ध्मा** (७.३.७८) इत्येनेन सीद-आदेशः → सीद + अ → **अतो गुणे** (६.१.९७) इत्यनेन अपदान्तात् अतः गुणे पूर्वपरयोः पररूपम् एकादेशः → सीद → सीद + शतृ → **अतो गुणे** (६.१.९७) इत्यनेन पूर्वपरयोः पररूपम् एकादेशः → सीदत्

षद्लृ विसरणगत्यवसादनेषु इति धातुः भ्वादौ अपि तुदादौ अपि भवति | भेदः अस्ति **आच्छीनद्योर्नुम्** इत्यनेन तुदादौ शतरि स्त्रीयां नुम्-विकल्पः | सीदन्, सीदन्ती, सीदती |

शद्लृ + श → शद् + अ → **पा-घ्रा-ध्मा** (७.३.७८) इत्यनेन शीय-आदेशः → शीय + अ → **अतो गुणे** (६.१.९७) → शीय → शीय + शानच् → शीय + आन → **आने मुक्** (७.२.८२) इत्यनेन आने परे अदन्ताङ्गस्य मुक्-आगमः → शीय + मान → शीयमान |

शद्लृ शातने इति धातुः भ्वादौ अपि तुदादौ अपि भवति | उभयत्र रूपाणि समानानि |

**अतो गुणे** (६.१.९७) = अपदान्तात् अतः गुणे पूर्वपरयोः पररूपम् एकादेशः संहितायाम् | गुणः इत्युक्तौ अ, ए, ओ | अतः पञ्चम्यन्तं, गुणे सप्तम्यन्तं, द्विपदमिदं सूत्रम् | **उस्यपदान्तात्** (६.१.९६) इत्यस्मात् **अपदान्तात्** अपि च **एङि पररूपम्** (६.१.९४) इत्यस्मात् **पररूपम्** इत्यनयोः अनुवृत्तिः | **एकः पूर्वपरयोः** (६.१.८४), **संहितायाम्** (६.१.७१) इत्यनयोः अधिकारः | अनुवृत्ति-सहितं सूत्रम्— **गुणे अपदान्तात् अतः पूर्वपरयोः एकः पररूपं संहितायाम्** |

इदं सूत्रं **वृद्धिरेचि** (६.१.८८), **अकः सवर्णे दीर्घः** (६.१.१०१) इत्यनयोः अपवादभूतसूत्रम् |

यथा—

| | |
|---|---|
| पठ + अत् → पठत् | **अतो गुणे** (६.१.९७), अत्र **अकः सवर्णे दीर्घः** इत्यस्य अपवादभूतसूत्रम् |
| सेव + ए → सेवे | **अतो गुणे** (६.१.९७), अत्र **वृद्धिरेचि** इत्यस्य अपवादभूतसूत्रम् |

b. इष्-धातोः छकारादेशः (एकः धातुः)

तुदादौ इष इच्छायाम् इति धातुः |

**इषुगमियमां छः** (७.३.७७) = इष्, गम्, यम् एषां छकारादेशः भवति शिति परे | इषुश्च गमिश्च यम् च तेषामितरेतरद्वन्द्वः इषुगमियमः, तेषाम् इषुगमियमाम् | इषुगमियमाम् षष्ठ्यन्तं, छः प्रथमान्तं, द्विपदमिदं सूत्रम् | **ष्ठिवुक्लमुचमां शिति** (७.३.७५) इत्यस्मात् **शिति** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहित–सूत्रमेवम्— **इषुगमियमां अङ्गस्य छः शिति** | **अलोन्त्यस्य** (१.१.५२) इत्यनेन छ्–आदेशः अन्तिमवर्णस्य स्थाने न तु पूर्णधातोः स्थाने |

केवलं शिति परे इति धेयम् | अतः इच्छति परन्तु एषिष्यति |

इष् + श → **इषुगमियमां छः**, **अलोन्त्यस्य** इत्याभ्यं ष्–स्थाने छ् → इछ् + अ → **छे च** (६.१.७३) इत्यनेन छकारे परे संहितायां विषये ह्रस्वस्य स्वरस्य तुक्–आगमो भवति | **आद्यन्तौ टकितौ** (१.१.४६) इत्यनेन इकारस्य अनन्तरं (न तु पूर्वम्) | इछ् + अ → इत्छ् + अ → **स्तोः श्चुना श्चुः** (८.४.४०) इत्यनेन तवर्गस्य शकारचवर्गाभ्यां योगे तवर्गस्य क्रमात् चवर्ग आदेशः → इत्छ् + अ → इच्छ् + अ → इच्छ → इच्छ + अत् → **अतो गुणे** (६.१.९७) इत्यनेन पूर्वपरयोः पररूपम् एकादेशः → इच्छत्

| | |
|---|---|
| इष → इष् | **उपदेशेऽजनुनासिक इत्** |
| इष् + अ → इछ् + अ | **इषुगमियमां छः** |
| इछ् → इत्छ् | **छे च** (६.१.७३), **आद्यन्तौ टकितौ** (१.१.४६) |
| इत्छ् → इच्छ् | **स्तोः श्चुना श्चुः** (८.४.४०) |
| इच्छ् + अ → इच्छ | वर्णमेलने |
| इच्छ + अत् | **अतो गुणे** (६.१.९७) |
| इच्छत् | |

**छे च** (६.१.७३) = छकारे परे, ह्रस्वस्वरस्य तुक् आगमः भवति | छे सप्तम्यन्तं, च अव्ययपदम्, द्विपदमिदं सूत्रम् | अनुवृत्ति–सहितसूत्रम्— **ह्रस्वस्य तुक् छे च संहितायाम्** |

अत्र इछ् इति स्थितिः | इछ् इत्यस्मिन् 'इ' ह्रस्वस्वरः, अपि च छकारः परे अस्ति | अतः तुक्–आगमः भवति— किन्तु कुत्र ? प्रथमप्रश्नः अस्ति यत् अयं तुगागमः कस्य आगमः ? ह्रस्वस्वरस्य इति सूत्रेण उक्तम् | तदा इकारात् प्राक् अथवा परे इति जिज्ञासायां सत्याम्, अग्रिमं सूत्रम् उत्तरं ददाति |

**आद्यन्तौ टकितौ** (१.१.४६) = टित् च कित् च यस्य आगमः, तस्य क्रमशः आदौ च अन्ते च अवयवः भवति | आगमः टित् चेत् पूर्वम् आयाति; आगमः कित् चेत् अन्ते आयाति | आदिश्च अन्तश्च आद्यन्तौ इतरेतरद्वन्द्वः, टश्च कश्च टकौ, इतरेतरद्वन्द्वः, टकौ इतौ ययोः तौ टकितौ, बहुव्रीहिः | आद्यन्तौ प्रथमान्तं, टकितौ प्रथमान्तं, द्विपदमिदं सूत्रम् | अनुवृत्ति–सहितसूत्रम्— **आद्यन्तौ टकितौ** |

तुक् कित् अस्ति अतः अनेन सूत्रेण इछ् इत्यस्मिन् इकारात् परे आयाति | तुक् इत्यस्मिन् क् इत्, उ इत्, त् अवशिष्यते | अतः इछ् → इत्छ् |

3. <u>सम्प्रसारणिनः धातवः</u>—

**ग्रहि ज्या वयि व्यधि वष्टि विचति वृश्चति पृच्छति भृज्जतीनां ङिति च** (३.१.१३) = ग्रह्, ज्या, वय्, व्यध्, वश्, **व्यच्, व्रश्च्, प्रच्छ्, भ्रस्ज्,** एषां सम्प्रसारणं भवति किति ङिति प्रत्यये परे |

ओव्रश्चू → व्रश्च् → वृश्च → वृश्चत्

प्रच्छ् → पृच्छ् → पृच्छ → पृच्छत्

भ्रस्ज → भ्रज्ज् → भृज्ज → भृज्जत्, भृज्जमान [**स्तोः श्चुना श्चुः, झलां जश् झशि**]

व्यच → व्यच् → विच → विचत्

4. <u>नुमागमः</u> (8 धातवः)

एतावता अस्माभिः दृष्टं यत् धातुः इदित् चेत्, नुमागमस्य प्रसक्तिः | यथा वदि–धातुः इदित् (ह्रस्व–इकारः इत् यस्य सः) अस्ति अतः **इदितो नुम् धातोः** (७.१.५८) इति सूत्रेण नुमागमः विहितः | वदि → वद् → वन्द् → वंद् → वन्द् इति भवति | परन्तु तुदादिगणे कश्चन अन्तर्गणः अस्ति (मुचाद्यन्तर्गणः) यत्र धातुः इदित् नास्ति चेदपि नुमागमः विधीयते |

<u>मुचाद्यन्तर्गणः</u>

मुचॢ → मुच्

षिच → सिच्

विद्ॢ → विद्

खिद → खिद्

पिश → पिश्

कृती → कृत्

लिप → लिप्

लुप्ॢ → लुप्

मुच् + श → मुच् + अ →

**शो मुचादीनाम्** (७.१.५९) = मुचादीनां नुमागमः भवति शः परे |

**मिदचोऽन्त्यात्परः** (१.१.४७) = यः आगमः मित् अस्ति, सः अच्–वर्णेषु अन्त्यात् परः आयाति | म् इत् यस्य सः मित्, बहुव्रीहिः | मित् प्रथमान्तम्, अचः षष्ठ्यन्तम्, अन्त्यात् पञ्चम्यन्तं, परः प्रथमान्तम् अनेकपदमिदं सूत्रम् |

नुम् आगमः मित् अस्ति (मकारः इत् यस्य सः), अतः नुम् अचः अन्त्यात् परः आयाति |

उदा--

मुचॢ → मुच्  **उपदेशेऽजनुनासिक इत्**

मुच् → मुन्च्  **शो मुचादीनाम्**

मुन्च् → मुंच्  **नश्चापदान्तस्य झलि**

मुंच् → मुञ्च्  **अनुस्वारस्य ययि परसवर्णः**

मुञ्च् + श + अत् → मुञ्चत्

खिद → खिद् → खिन्द् → खिंद् → खिन्द्  [खिन्द् + श + शतृ → खिन्दत्]

लिप → लिप् → लिन्प् → लिंप् → लिम्प्  [लिम्प् + श + शतृ → लिम्पत्]

**नश्चापदान्तस्य झलि** (८.३.२४) = झलि अपदान्तस्य नकारस्य मकारस्य च स्थाने अनुस्वारादेशो भवति | पदस्य अन्तः पदान्तः, न पदान्तः अपदान्तः तस्य अपदान्तस्य | नः षष्ठ्यन्तं, च अव्ययपदम्, अपदान्तस्य षष्ठ्यन्तं, झलि सप्तम्यन्तं, अनेकपदमिदं सूत्रम् | **मोऽनुस्वारः** इत्यस्मात् **मः** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहितं सूत्रमेवम्—**झलि अपदान्तस्य मः नः च अनुस्वारः** इति | झल्-प्रत्याहारे वर्गस्य प्रथमः, द्वितीयः, तृतीयः, चतुर्थः च वर्णाः अपि च श्, ष्, स्, ह् इति वर्णाः अन्तर्भूताः |

परसवर्णादेशः— **अनुस्वारस्य ययि परसवर्णः**

**अनुस्वारस्य ययि परसवर्णः** (८.४.५८) = ययि अनुस्वारस्य स्थाने परसवर्णादेशो भवति | परस्य सवर्णः, परसवर्णः, षष्ठी तत्पुरुषः | अनुस्वारस्य षष्ठ्यन्तं, ययि सप्तम्यन्तं, परसवर्णः प्रथमान्तं, त्रिपदमिदं सूत्रम् | यय्-प्रत्याहारे श्, ष्, स्, ह् एतान् वर्जयित्वा सर्वे हल्-वर्णाः अन्तर्भूताः | **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति-सहितं सूत्रमेवम्— **अनुस्वारस्य ययि परसवर्णः संहितायाम्** इति |

5. <u>सन्धिकार्यम्</u> (2 धातू)

ओलस्जी → लस्ज्  **उपदेशेऽजनुनासिक इत्**

लस्ज् → लश्ज्  **स्तोः श्चुना श्चुः** (८.४.४०)

लश्ज् → लज्ज्  **झलां जश् झशि** (८.४.५३)

लज्ज् + श + अत् → लज्जत्  वर्णमेलनेन शत्रन्तरूपं निष्पन्नम्

**झलां जश् झशि** (८.४.५३) = झलः स्थाने जश्-आदेशः भवति, जशि परे | झलां षष्ठ्यन्तम्, जश् प्रथमान्तम्, झशि सप्तम्यन्तम्, त्रिपदमिदं सूत्रम् | झल् = किमपि व्यञ्जनम्, वर्गाणां पञ्चमम्, य-व-र-ल च विहाय | जश् = कस्यापि वर्गस्य तृतीयवर्णः (ज्, ब्, ग्, ड्, द्) | झश् = वर्गीय-व्यञ्जनानां तृतीयाः चतुर्थाश्च सदस्याः |

टुमस्जो अपि तथा | मस्ज् → मश्ज् → मज्ज् → मज्ज् + अ → मज्ज → मज्ज + अत् → मज्जत्

6. आय प्रत्ययः (1 धातुः)

तुदादौ विच्छ् इति धातुः |

**गुपूधूपविच्छपणिपनिभ्यः आयः** (३.१.२८) = एभ्यः धातुभ्यः आय–प्रत्ययः स्यात् स्वार्थे | गुपूश्च धूपश्च विच्छश्च पणिश्च पनिश्च गुपूधूपविच्छपणिपनयः इतरेतरद्वन्द्वः, तेभ्यः | **धातोः**, **प्रत्ययः**, **परश्च** इत्येषाम् अधिकारः | अनुवृत्ति–सहितसूत्रम्—
**गुपूधूपविच्छपणिपनिभ्यः धातुभ्यः आयः प्रत्ययः परश्च** |

विच्छ् + आय = विच्छाय + अ → **अतो गुणे** (६.१.९७) → विच्छाय → विच्छाय + अत् → विच्छायत्

7. विकरणप्रत्यय–विकल्पः (1 धातुः)

**वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः** (३.१.७९) = भ्राश्, भ्लाश्, भ्रमु, क्रम्, क्लम्, त्रस्, **त्रुट्**, लष्, एभ्यः श्यन्–प्रत्ययः विकल्पेन भवति | श्यन्–अभावे यः तत्तद्गणस्य विकरण–प्रत्ययः विधीयते, सः भवति एव | भ्राशश्च, भ्लाशश्च, भ्रमुश्च, क्रमुश्च, क्लमुश्च, त्रसिश्च, त्रुटिश्च, लष् च तेषां समाहारद्वन्द्वः भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलष्, तस्मात् भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः | वा अव्ययपदं, भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः पञ्चम्यन्तं, द्विपदमिदं सूत्रम् | **दिवादिभ्यः श्यन्** (३.१.६९) इत्यस्मात् **श्यन्** इत्यस्य अनुवृत्तिः | **सार्वधातुके यक्** (३.१.६७) इत्यस्मात् **सार्वधातुके** इत्यस्य अनुवृत्तिः | **कर्तरि शप्** (३.१.६८) इत्यस्मात् **कर्तरि** इत्यस्य अनुवृत्तिः |

तुदादौ त्रुट् → शप्रत्यये त्रुटत्, विकल्पेन श्यन्–प्रत्यये त्रुट्यत् |

इत्यनेन तुदादिगणस्य सर्वेषां धातूनां शत्रन्तरूपाणि साधितानि |

Swarup – Dec 2014